कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ प्रथम काण्डे चतुर्थः प्रश्नः॥

हरिः ओम्॥ आ ददे ग्रावाऽस्यध्वरकृद्देवेभ्यो गम्भीरमिममध्वरं कृध्युत्तमेन पविनेन्द्राय सोमगुं सुषुतं मधुमन्तं पयस्वन्तं वृष्टिवनिमिन्द्राय त्वा वृत्रघ्न इन्द्राय त्वा वृत्रतुर इन्द्राय त्वाऽभिमातिघ्न इन्द्राय त्वाऽऽदित्यवत इन्द्राय त्वा विश्वदेव्यावते श्वात्राः स्थ वृत्रतुरो राधो गूर्ता अमृतस्य पत्नीस्ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबतोपहूतो युष्माकगुं [१] सोमः पिबतु यत्ते सोम दिवि ज्योतिर्यत्पृथिव्यां यदुरावन्तरिक्षे तेनाऽस्मै यजमानायोरु राया कृध्यधि दात्रे वोचो धिषणे वीडू सती वीडयेथामूर्जं दधाथामूर्जं मे धत्तं मा वाग्गुं हिग्गुंसिषं मा मा हिग्गुंसिष्टं प्रागपागुदगधराक्तास्त्वा दिश आ धावन्त्वम्ब नि ष्वर। यत्ते सोमाऽदाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा॥[२]

युष्माकगग् स्वर यत्ते नवच॥1.4.1॥

वाचस्पतये पवस्व वाजिन् वृषा वृष्णो अग्गुंशुभ्यां गभस्तिपूतो देवो देवानां पवित्रमसि येषां भागोऽसि तेभ्यस्त्वा स्वांकृतोऽसि मधुमतीर्न इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाऽष्टूर्वन्तरिक्षमन्विहि स्वाहा त्वा सुभवः सूर्याय देवेभ्यस्त्वा मरीचिपेभ्य एष ते योनिः प्राणाय त्वा॥[३]

वाचः सप्तचत्वारिग्गंशत्॥1.4.2॥

उपयामगृहीतोऽस्यन्तर्यच्छ मघवन् पाहि सोममुरुष्य रायः समिषो यजस्वाऽन्तस्ते दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षग्ं सजोषा देवैरवरैः परैश्चाऽन्तर्यामे मघवन् मादयस्व स्वांकृतोऽसि मधुमतीर्न इषस्कृधि विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाऽष्टूर्वन्तरिक्षमन्विहि स्वाहा त्वा सुभवः सूर्याय देवेभ्यस्त्वा मरीचिपेभ्य एष ते योनिरपानाय त्वा॥[४]

देवेभ्यः सप्त च॥1.4.3॥

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार। उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम्॥ उपयामगृहीतोऽसि वायवे त्वेन्द्रवायू इमे सुताः। उप प्रयोभिरागतमिन्दवो वामुशन्ति हि। उपयामगृहीतोऽसीन्द्रवायुभ्यां त्वैष ते योनिः सजोषाभ्यां त्वा॥[५]

आ वायो त्रिचत्वारिग्ंशत्॥1.4.4॥

अयं वां मित्रावरुणा सुतः सोम ऋतावृधा। ममेदिह श्रुतग्ं हवम्॥ उपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वैष ते योनिर् ऋतायुभ्यां त्वा॥[६]

अयं वां विग्ंशतिः॥1.4.5॥

या वां कशा मधुमत्यश्विना सूनृतावती। तया यज्ञं मिमिक्षतम्॥ उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा॥[७]

या वामष्टादश॥1.4.6॥

प्रातर्युजौ वि मुच्येथामश्विनावेह गच्छतम्। अस्य सोमस्य पीतये॥ उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिरश्विभ्यां त्वा॥[८]

प्रातर्युजावेकान्न विग्ंशतिः॥1.4.7॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इममपाग्ं संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति॥ उपयामगृहीतोऽसि शण्डाय त्वैष ते योनिर्वीरतां पाहि॥[९]

अयं वेनः पञ्चविग्ंशतिः॥1.4.8॥

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदग्ं सुवर्विदं प्रतीचीनं वृजनं दोहसे गिराऽऽशुं जयन्तमनु यासु वर्धसे॥ उपयामगृहीतोऽसि मर्काय त्वैष ते योनिः प्रजाः पाहि॥[१०]

तग्ं षड्विग्ंशतिः॥1.4.9॥

ये देवा दिव्येकादश स्थ पृथिव्यामध्येकादश स्थाऽप्सुषदो महिनैकादश स्थ ते देवा यज्ञमिमं जुषध्वमुपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥[११]

ये देवा स्त्रि चत्वारिग्ंशत्॥1.4.10॥

त्रिग्ंशात्त्रयश्च गणिनो रुजन्तो दिवग्ं रुद्राः पृथिवीं च सचन्ते। एकादशासो अप्सुषदः सुतग्ं सोमं जुषन्ताग्ं सवनाय विश्वे॥ उपयामगृहीतोऽस्याग्रयणोऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभि सवना पाहि विष्णुस्त्वां पातु विशं त्वं पाहीन्द्रियेणैष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥[१२]

त्रिग्ंशद्द्विचत्वारिग्ंशत्॥1.4.11॥

उपयामगृहीतोऽसीन्द्राय त्वा बृहद्बते वयस्वत उक्थायुवे यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वैष ते योनिरिन्द्राय त्वोक्थायुवे॥[१३]

उपयामगृहीतो द्वाविग्ंशतिः॥1.4.12॥

मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम्। कविग्ं सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥ उपयामगृहीतोऽस्यग्नये त्वा वैश्वानराय ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोऽच्युतानामच्युतक्षित्तम एष ते योनिरग्नये त्वा वैश्वानराय॥[१४]

मूर्धानं पञ्चत्रिग्ंशत्॥1.4.13॥

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयामगृहीतोऽसि सग्ंसर्पोऽस्यग्ंहस्पत्याय त्वा॥[१५]

मधुश्च त्रिग्ंशत्॥1.4.14॥

इन्द्राग्नी आ गतग्ं सुतं गीर्भिर्नभो वरेण्यम्। अस्य पातं धियेषिता॥ उपयामगृहीतोऽसीन्द्राग्निभ्यां त्वैष ते योनिरिन्द्राग्निभ्यां त्वा॥[१६] *॥1.4.15॥*

ओमासश्चर्षणीधृतो विश्वे देवास आ गत। दाश्वाग्ंसो दाशुषः सुतम्॥ उपयामगृहीतोऽसि विश्वेभ्यस्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥[१७]
इन्द्राग्नी ओमासो विग्ंशतिर्विग्ंशतिः ॥1.4.15-16॥

मरुत्वन्तं वृषभं वावृधानमकवारिं दिव्यग्ं शासमिन्द्रम्। विश्वासाहमवसे नूतनायोऽग्रग्ं सहोदामिह तग्ं हुवेम॥ उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते॥[१८]
मरुत्वन्तग्ं षड्विग्ंशतिः॥1.4.17॥

इन्द्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सुतस्य। तव प्रणीती तव शूर शर्मन्ना विवासन्ति कवयः सुयज्ञाः॥ उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते योनिरिन्द्राय त्वा मरुत्वते॥[१९] *॥1.4.18॥*

मरुत्वाग्ं इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय। आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वग्ं राजाऽसि प्रदिवः सुतानाम्॥ उपयामगृहीतोऽसीन्द्राय त्वा मरुत्वत एष ते

योनिरिन्द्राय त्वा मरुत्वते॥[२०]

इन्द्र मरुत्वो मरुत्वानेकान्न त्रिग्ंशदेकान्न त्रिग्ंशत्॥1.4.18-19॥

महाग्ं इन्द्रो य ओजसा पर्जन्यो वृष्टिमाग्ं इव। स्तोमैर्वत्थस्य वावृधे॥ उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा॥[२१]

महानेकान्न विग्ंशतिः॥1.4.20॥

महाग्ं इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः। अस्मद्रियग्वावृधे वीर्यायोऽरुः पृथुः सुकृतः कर्तृभिर्भूत्॥ उपयामगृहीतोऽसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय त्वा॥[२२]

महान्नृवत्षड्विग्ंशतिः॥1.4.21॥

कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे। उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते॥ उपयामगृहीतोऽस्यादित्येभ्यस्त्वा॥ कदा चन प्र युच्छस्युभे नि पासि जन्मनी। तुरीयाऽऽदित्य सवनं त इन्द्रियमा तस्थावमृतं दिवि॥ यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः। आ वोऽर्वाची सुमतिर्ववृत्यादग्ंहोश्चिद्या वरिवोवित्तराऽसत्॥ विवस्व आदित्यैष ते सोमपीथस्तेन मन्दस्व तेन तृप्य तृप्यास्म ते वयं तर्पयितारो या दिव्या वृष्टिस्तया त्वा श्रीणामि॥[२३]

वस्सप्तविग्ंशतिश्च॥1.4.22॥

वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यग्ं सावीः। वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम॥ उपयामगृहीतोऽसि देवाय त्वा सवित्रे॥[२४]

वामं चतुर्विग्ं शतिः॥1.4.23॥

अदब्धेभिः सवितः पायुभिष्ट्वग्ं शिवेभिरद्य परि पाहि नो गयम्। हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशग्ंस ईशत॥ उपयामगृहीतोऽसि देवाय त्वा सवित्रे॥[२५]

अदब्धेभिस्त्रयोविग्ंशतिः॥1.4.24॥

हिरण्यपाणिमूतये सवितारमुप ह्वये। स चेत्ता देवता पदम्॥ उपयामगृहीतोऽसि देवाय त्वा सवित्रे॥[२६]

हिरण्यपाणिं चतुर्दश॥1.4.25॥

सुशर्माऽसि सुप्रतिष्ठानो बृहदुक्षे नम एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥[२७]

सुशर्मा द्वादश॥1.4.26॥

बृहस्पतिसुतस्य त इन्दो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णाम्यग्ना ३ इ पत्नीवा ३ स्सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा॥[२८]

बृहस्पतिसुतस्य पञ्चदश॥1.4.27॥

हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्ता पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य हरिवन्तं ग्रहं गृह्णामि हरीः स्थ हर्योर्धानाः सह सोमा इन्द्राय स्वाहा॥[२९]

हरिरसि षड्विग्ंशतिः॥1.4.28॥

अग्न आयूग्ंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्॥ उपयामगृहीतोऽस्यग्नये त्वा तेजस्वत एष ते योनिरग्नये त्वा तेजस्वते॥[३०]

अग्न आयूग्ंषि त्रयोविग्ंशतिः॥1.4.29॥

उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः। सोममिन्द्र चमू सुतम्॥ उपयामगृहीतोऽसीन्द्राय त्वौजस्वत एष ते योनिरिन्द्राय त्वौजस्वते॥[३१]

उत्तिष्ठन्नेकविग्ंशतिः॥1.4.30॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचनम्॥ उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय त्वा भ्राजस्वते॥[३२]

तरणिर्विग्ंशतिः॥1.4.31॥

आ प्यायस्व मदिन्तम सोम विश्वाभिरूतिभिः। भवा नः सप्रथस्तमः॥[३३]

आ प्यायस्व नव॥1.4.32॥

ईयुष्टे ये पूर्वतरामपश्यन् व्युच्छन्तीमुषसं मर्त्यासः। अस्माभिरू नु प्रतिचक्ष्याऽभूदो ते यन्ति ये अपरीषु पश्यान्॥[३४]

ईयुरेकान्न विग्ंशतिः॥1.4.33॥

ज्योतिष्मतीं त्वा सादयामि ज्योतिष्कृतं त्वा सादयामि ज्योतिर्विदं त्वा सादयामि भास्वतीं त्वा सादयामि ज्वलन्तीं त्वा सादयामि मल्मलाभवन्तीं त्वा सादयामि दीप्यमानां त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि बोधयन्तीं त्वा सादयामि जाग्रतीं त्वा सादयामि॥[३५]

ज्योतिष्मतीग्ं षट्त्रिग्ंशत्॥1.4.34॥

प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा संयासाय स्वाहोद्यासाय स्वाहाऽवयासाय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा॥[३६]

प्रयासाय चतुर्विग्ं शतिः॥1.4.35॥

चित्तग्ं संतानेन भवं यक्ना रुद्रं तनिम्ना पशुपतिग्ग् स्थूलहृदयेनाग्निग्ं हृदयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमन्तः पार्श्वेनौषिष्ठहनग्ं शिङ्गीनिकोश्याभ्याम्॥[३७]

चित्तमष्टादश॥1.4.36॥

आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी। अर्वाचीनग्ं सु ते मनो ग्रावा कृणोतु

वग्नुना॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥ [३८]

आ तिष्ठ षड्विग्ंशतिः॥1.4.37॥

इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसमृषीणां च स्तुतीरुप यज्ञं च मानुषाणाम्॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥[३९]

इन्द्रमित्त्र्यविग्ंशतिः॥1.4.38॥

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि। आ त्वा पृणक्त्विन्द्रियग्ं रजः सूर्यं न रश्मिभिः॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥ [४०]

असावि सप्तविग्ंशतिः॥1.4.39॥

सर्वस्य प्रतिशीवरी भूमिस्त्वोपस्थ आऽधित। स्योनाऽस्मै सुषदा भव यच्छाऽस्मै शर्म सप्रथाः॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥[४१] *॥1.4.40॥*

महाग्ं इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु। स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥[४२]

सर्वस्य महान्थषड्विगं्शतिष्षड्विगं्शतिः ॥1.4.40-41॥

सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान्। जहि शत्रूगं्रप मृधो नुदस्वाऽथाऽभयं कृणुहि विश्वतो नः॥ उपयामगृहीतोऽसीन्द्राय त्वा षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥[४३]

सजोषास्त्रिगं्शत्॥1.4.42॥

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याऽग्नेः। आऽप्रा द्यावापृथिवी अन्तरिक्षगं्सूर्य आत्मा जगतस्तस्थुषश्च॥ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम॥ दिवं गच्छ सुवः पत रूपेण [४४] वो रूपमभ्यैमि वयसा वयः। तुथो वो विश्ववेदा वि भजतु वर्षिष्ठे अधि नाके। एतत्ते अग्ने राध ऐति सोमच्युतं तन्मित्रस्य पथा नयर्तस्य पथा प्रेत चन्द्रदक्षिणा यज्ञस्य पथा सुविता नयन्तीर् ब्राह्मणमद्य राध्यासमृषिमार्षेयं पितृमन्तं पैतृमत्यगं् सुधातुदक्षिणं वि सुवः पश्य व्यन्तरिक्षं यतस्व सदस्यैरस्मद्यात्रा देवत्रा गच्छत मधुमतीः प्रदातारमा विशताऽनवहायाऽस्मान् देवयानेन पथेत सुकृतां लोके सीदत तन्नः सग्ग्स्कृतम्॥[४५]

रूपेण सदस्यैरष्टादश च॥1.4.43॥

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः। त्वष्टा विष्णुः प्रजया सगं्

राणो यजमानाय द्रविणं दधातु॥ समिन्द्रणो मनसा नेषि गोभिः सग्ं सूरिभिर्मघवन्थ्सग्ग् स्वस्त्या। सं ब्रह्मणा देवकृतं यदस्ति सं देवानाग्ं सुमत्या यज्ञियानाम्॥ सं वर्चसा पयसा सं तनूभिरगन्महि मनसा सग्ं शिवेन। त्वष्टा नो अत्रव रिवः कृणो- [४६] त्वनु मार्ष्टु तनुवो यद्विलिष्टम्॥ यदद्य त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह। ऋधगयाड्ढधगुताऽशमिष्ठाः प्रजानन् यज्ञमुप याहि विद्वान्॥ स्वगा वो देवाः सदनमकर्म य आजग्म सवनेदं जुषाणाः। जक्षिवाग्ंसः पपिवाग्ंसश्च विश्वेऽस्मे धत्त वसवो वसूनि॥ यानाऽवह उशतो देव देवान्तान् [४७] प्रेरय स्वे अग्ने सधस्थे। वहमाना भरमाणा हवीग्ंषि वसुं घर्मं दिवमा तिष्ठताऽनु॥ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहैष ते यज्ञो यज्ञपते सहसूक्तवाकः सुवीरः स्वाहा देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं नो देव देवेषु यज्ञग्ग् स्वाहा वाचि स्वाहा वाते धा :॥[४८]

कृणोतु तानष्टाचत्वारिग्ंशच्च॥1.4.44॥

उरुग्ं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ। अपदे पादा प्रतिधातवेऽकरुताऽपवक्ता हृदयाविधश्चित्॥ शतं ते राजन्भिषजः सहस्रमुर्वी गम्भीरा सुमतिष्टे अस्तु। बाधस्व द्वेषो निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत्॥ अभिष्ठितो वरुणस्य पाशोऽग्नेरनीकमप आ विवेश। अपां नपात्प्रतिरक्षन्नसुर्यं दमेदमे [४९] समिधं यक्ष्यग्ने। प्रति ते जिह्वा घृतमुच्चरण्येथ्समुद्रे ते हृदयमप्स्वन्तः। सं त्वा विशन्त्वोषधीरुताऽऽपो यज्ञस्य त्वा यज्ञपते हविर्भिः। सूक्तवाके नमोवाके विधेमाऽवभृथ नि चङ्कुण निचेरुरसि नि चङ्कुणाऽव देवैर्देवकृतमेनोऽयाडव

मर्त्यैर्मर्त्यकृतमुरोरा नो देव रिषस्पाहि सुमित्रा न आप ओषधयः [५०] सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मो देवीराप एष वो गर्भस्तं वः सुप्रीतग्ं सुभृतमकर्म देवेषु नः सुकृतो ब्रूतात्प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाश एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेह्यपो अन्वचारिषग्ं रसेन समसृक्ष्महि। पयस्वाग्ं अग्न आऽगमं तं मा सग्ं सृज वर्चसा [५१]

दमेदम ओषधय आ षट्च॥1.4.45॥

यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम्॥ यस्मै त्वग्ं सुकृते जातवेद उ लोकमग्ने कृणवः स्योनम्। अश्विनग्ं स पुत्रिणं वीरवन्तं गोमन्तग्ं रयिं नशते स्वस्ति॥ त्वे सु पुत्र शवसोऽवृत्रन् काम कातयः। न त्वामिन्द्राति रिच्यते॥ उक्थउक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानग्ं [५२] सुतासः। यदीग्ं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते॥ अग्ने रसेन तेजसा जातवेदो वि रोचसे। रक्षोहाऽमीवचातनः॥ अपो अन्वचारिषग्ं रसेन समसृक्षमहि। पयस्वाग्ं अग्न आऽगमं तं मा सग्ं सृज वर्चसा॥ वसुर्वसुपतिर् हिकमस्यग्ने विभावसुः। स्याम ते सुमतावपि॥ त्वामग्ने वसुपतिं वसूनामभि प्र मन्दे [५३] अध्वरेषु राजन्न्। त्वया वाजं वाजयन्तो जयेमाभि ष्याम पृथ्सुतीर्मर्त्यानाम्॥ त्वामग्ने वाजसातमं विप्रा वर्धन्ति सुष्टुतम्। स नो रास्व सुवीर्यम्॥ अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन्न्। अयग्ं शत्रूञ्जयतु जर्हृषाणोऽयं वाजं जयतु वाजसातौ॥ अग्निनाऽग्निः समिध्यते

कवि-गृहपति-र्युवा। हव्यवाड्जुह्वास्यः॥ त्वग्ग् ह्यग्ने अग्निना विप्रो विप्रेण सन्थ्सता। सखा सख्या समिध्यसे॥ उदग्ने शुचयस्तव वि ज्योतिषा॥[५४]

मघवानं मन्दे ह्यग्ने चतुर्दश॥1.4.46॥

वाचः प्राणाय त्वा। उपयाम गृहीतोस्यपानाय त्वा। आ वायो वायवे सजोषाभ्यां त्वा। अयमृतायुभ्यां त्वा। या वामश्विभ्यां माध्वीभ्यां त्वा। प्रातर्युजावश्विभ्यां त्वा अयं वेनश्शण्डाय त्वैष ते योनिर्वीरतां पाहि। तं मर्काय त्वैष ते योनिः प्रजाः पाहि। ये देवास्त्रिंशदाग्रयणोसि विश्वेभ्यस्त्वा देवेभ्यः। उपयाम गृहीतोसीन्द्राय त्वोक्थायुवे। मूर्धानमग्नये त्वा वैश्वानराय। मधुश्च सग्ं सर्पोसि। इन्द्राग्नी इन्द्राग्निभ्यां त्वा। ओमासो विश्वेभ्यस्त्वा देवेभ्यः। मरुत्वन्तं त्रीणीन्द्राय त्वा मरुत्वते। महान्द्धे महेन्द्राय त्वा। कदाचनादित्येभ्यस्त्वा। कदा चन स्तरीर्विवस्व आदित्य। इन्द्रग्ं शुचिरपः। वामं त्रीन्देवाय त्वा सवित्रे। सुशमार्विश्वेभ्यस्त्वा देवेभ्यः। बृहस्पतिस्त्वष्ट्रा सोमं पिब स्वाहा। हरिरसि सह सोमा इन्द्राय स्वाहा। अग्न आयूग्ं ष्यग्नये त्वा तेजस्वते। उत्तिष्ठन्निन्द्राय त्वौजस्वते। तरणिस्सूर्याय त्वा भ्राजस्वते। आ तिष्ठाद्याष्षडिद्राय त्वा षोडशिने। उदु त्यं चित्रम्। अग्नेनय दिवं गच्छ। उरुमायुष्टे यद्देवा मुमुग्धि। अग्ना विष्णू मुमुक्तम्। परा वै पड्क्त्यः। देवा वै ये देवाः पड्क्त्यौ। परा वै सवाचम्। देवासुराः कार्यम्। भूमिर्व्यतृष्यन्। प्रजापतिर्व्यक्षुध्यन्। भूमिरादित्या वै। अग्नि होत्रमादित्यो वै। भूमिर्लोकस्सलोकस्सुलोकः। विष्णोरुदुत्तमम्। अन्नपते पुनस्त्वाऽऽदित्याः। यस्त्वा सुष्टुतम्। त्वमग्ने सुष्टुतिम्। यस्त्वा विरोचसे। त्वमग्ने वि चर्षणे॥

आ ददे वाचस्पतय उपयामगृहीतोस्या वायो अयं वां या वां प्रातर्युजावयं वेनस्तं प्रत्नथा ये देवास्त्रिग्ं शदुपयामगृहीतोसि मूर्धानंमधुश्चेन्द्राग्नी ओमासो मरुत्वन्तमिन्द्र मरुत्वो मरुत्वान्महान्महान्नृवत्कदा वाममदब्धेभिर् हिरण्यपाणिग्ं सुशर्मा बृहस्पतिर् हरिरस्यग्न उत्तिष्ठन्नरणिरा प्यायस्वेयुष्टे ये ज्योतिष्मतीं प्रयासाय चित्तमा तिष्ठेन्द्रमसावि सर्वस्य महान्थ्सजोषा उदु त्यं धातोरुग्ं हि यस्त्वा षट्चत्वारिग्ंशत्॥46॥

आ ददे ये देवा महानुत्तिष्ठन्त्सर्वन्य सन्तुदुर्मित्राश्चतुःपञ्चाशत्॥54॥
आ ददे तव वि ज्योतिषा॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति प्रथमकाण्डे चतुर्थः प्रश्नः॥